# Sarvasammata Bhavantu

# સર્વસમ્મતા ભવન્તુ

## Document Information

Text title : Sarvasammata Bhavantu

File name : sarvasammatAbhavantu.itx

Category : misc, sanskritgeet

Location : doc_z_misc_general

Author : vijayan vi. paTTAmbI

Latest update : August 11, 2024

Send corrections to : sanskrit at cheerful dot c om

This text is prepared by volunteers and is to be used for personal study and research. The file is not to be copied or reposted without permission, for promotion of any website or individuals or for commercial purpose.

**Please help to maintain respect for volunteer spirit.**

Please note that proofreading is done using Devanagari version and other language/scripts are generated using **sanscript**.

August 12, 2024

*sanskritdocuments.org*

# સર્વસમ્મતા ભવન્તુ

જૂન માસસમારમ્ભે કેરલેષુ યથાવિધિ ।
વિદ્યાલયાઃ યથાપૂર્વં ઉદ્ઘાટ્યન્તે ચ સર્વશઃ ॥ ૧॥

છાત્રાસ્ત્વુત્સાહિનો ભૂત્વા ધૃત્વા વસ્ત્રં ચ નૂતનમ્ ।
આદાય નૂતનં છત્રં ગચ્છન્તિ પુણ્યમન્દિરમ્ ॥ ૨॥

પ્રપ્ય વિદ્યાલયં તૂર્ણં ચારુવર્ણૈશ્ચ લેપિતમ્ ।
આચાર્યાંસ્તુ પ્રણમ્યા /થ સ્વસ્થાનમાર્જયન્તુ ભોઃ ॥ ૩॥

ભાષાપઠનસન્દર્ભે સંસ્કૃતં સર્વસમ્મતમ્ ।
સ્વીકુરત તમેવાત્ર ભવતાં શ્રેયસે મુદા ॥ ૪॥

સંસ્કૃતં સર્વભાષાણાં જનની શક્તિશાલિની ।
સરલં લલિતં ચૈવ સંસ્કૃતં લોકરઞ્જકમ્ ॥ ૫॥

પઠનાત્ સંસ્કૃતસ્યાસ્ય જાયેત પરમોન્નતિઃ ।
પરાશ્રયં વિના નિત્યં જીવિતું પ્રભવિષ્યથ ॥ ૬॥

પરનિન્દાં પરિત્યજ્ય પરસાહાય્યતત્પરાઃ ।
અહઙ્કારં ચ ત્યક્ત્વાથ ભવત ચોત્તમોત્તમઃ ॥ ૭॥

પુરાણેષુ પુરાણં તત્ નવીનેષુ ચ નૂતનમ્ ।
સંસ્કૃતં સર્વલોકેભ્યઃ ચિત્ત સૌખ્યપ્રદાયકમ્ ॥ ૮॥

ઇતિહાસપુરાણાનાં સારસર્વસ્વમાર્જિતમ્ ।
સુભાષિતસુગન્ધૈશ્ચ ભૂષિતં મમ સંસ્કૃતમ્ ॥ ૯॥

પઠત પઠત છાત્રાઃ સંસ્કૃતં હિ નિરન્તરમ્ ।
પઠન્તો સંસ્કૃતં નિત્યં ભવેયુઃ સર્વસમ્મતાઃ ॥ ૧૦॥

(૨૦૨૩-૨૪ વિદ્યાલયીય વર્ષસ્ય શુભકામનાઃ )

– વિજયન્ વિ. પટ્ટામ્બિ

*Sarvasammata Bhavantu*

pdf was typeset on August 12, 2024

Please send corrections to *sanskrit@cheerful.com*